# स्फोटतत्त्वनिरूपणम्


## हंसराजजोशी

*श्री जनतासंस्कृतमाध्यमिकविद्यालयः, विजौरी, दाङ*

hansrajjoshi001@gmail.com

Orcid : https://orcid.org/0009-0001-8970-157X


https://doi.org/10.3126/anveshana.v4i1.96926


### शोधसारः

*अन्वेषणात्मकलेखोऽयं व्याकरणशास्त्रस्य स्फोटतत्त्वविषयस्योपर्यनुसन्धानं कृत्वा विरचितोऽस्ति। सभेदस्फोटतत्त्वविश्लेषणपूर्वकं वाक्यस्फोटस्य मुख्यत्त्वनिरूपणमस्य लेखस्योद्देश्यमस्ति। लेखश्चायं गुणात्मकस्वरूपकोऽस्ति। अत्र पुस्तकालस्रोतोभ्यः व्याकरणदर्शनस्य वाक्यपदीय-वैयाकरणसिद्धान्तमञ्जुषादिग्रन्थानवलोक्य तेभ्यः स्फोटतत्त्वसम्बद्धाः तथ्यरूपसामग्रीः सङ्कलय्य ताषां वर्णनं विश्लेषणञ्च कृत्वा निष्कर्षः स्थापितः। अतोऽत्र वर्णनात्मको विश्लेषणात्मकश्चाध्ययनविधिरवलम्वितोऽस्ति। अस्य सैद्धान्तिकपर्याधारः स्फोटसिद्धान्त एव। संसारस्य सकलो व्यवहारः शब्दप्रयोगाधीनः। शब्दादेवार्थो ज्ञायते। अर्थं ज्ञात्वैव जनानां प्रवृत्तिर्निवृत्तिर्वा भवति। तादृशस्यार्थस्य बोधकः शब्दः कः? इति विचारणीयम्। वैयाकरणमते स्फोट एव शब्दः कथ्यते। स च स्फोटो वस्तुत एको नित्यो विभुश्च,किन्तु वर्णपदवाक्यरूपोपाधिभेदादष्टविधः। तेषु वाक्यस्फोट एव मुख्यो भवति। व्यवहारेऽपि वाक्यमेवार्थबोधको भवति। वाक्येनैवार्थस्य पूर्णता जायते। अत्र व्याकरणेतरदर्शनस्याऽपि सम्मतिर्दृश्यते। पदसमूहरूपवाक्यमेव पूर्णतया अर्थबोधने समर्थं भवति। भर्तृहर्यादिभिरपि वाक्यस्फोटस्यैव मुख्यत्त्वं प्रतिपादितं दृश्यते। अत एव अष्टषु स्फोटेषु वाक्यस्फोटो मुख्यः,तस्यैव लोकेऽर्थबोधकत्वात्तेनैवार्थसमाप्तेश्चेति निष्कर्षोऽत्र स्थापितः।*


**शब्दकुञ्जी -** वर्णः, पदम्, वाक्यम्, जातिः, व्यक्तिः।

### विषयपरिचयः

कोऽयं स्फोट इति जिज्ञासायामुच्यते— चतुर्विधा हि वागस्ति– परा, पश्यन्ती, मध्यमा, वैखरी चेति। तत्र मूलाधारस्थपवनसंस्कारीभूता मूलाधारस्था शब्दब्रह्मरूपा स्पन्दशून्या विन्दुरूपिणी परा वागुच्यते। नाभिपर्यन्तमागच्छता तेन वायुनाभिव्यक्ता मनोगोचरीभूता पश्यन्ती वागुच्यते। एतद् द्वयं वाग्ब्रह्म योगिनां समाधौ निर्विकल्पक (चिन्मात्रविषयक)–सविकल्पकज्ञानविषयक इत्युच्यते। ततो हृदयपर्यन्तमागच्छता तेन वायुनाभिव्यक्ता तत्तदर्थवाचकस्फोटरूपा श्रोत्रग्रहणायोग्यत्वेन सूक्ष्मा जपादौ बुद्धिनिग्राह्या मध्यमा वागुच्यते। तत

आस्यपर्यन्तमागच्छता तेन वायुनोर्ध्वमाक्रामता च मूर्धानमाहत्य परावृत्य च तत्तत्स्थानेष्वभिव्यक्ता परश्रोत्रेणापि ग्राह्या वैखरी वागुच्यते। युगपदेव मध्यमावैखरीभ्यां नाद उत्पद्यते। तत्र मध्यमानादोऽर्थवाचकस्फोटात्मक– शब्दव्यञ्जकः। मध्यमानादश्च सूक्ष्मतरः कर्णपिधाने जपादौ च सूक्ष्मातिवायुव्यङग्यः शब्दब्रह्मरूपस्फोटव्यञ्जकश्च। तादृशमध्यमानादव्यङ्ग्यःशब्दः स्फोटात्मको ब्रह्मरूपो नित्यश्च। स च यद्यप्येकोऽखण्डश्च, तथापि पदं वाक्यं वा जपाकुसुमादिलौहि त्यपीतत्वदिव्यञ्जकोपरागवशाल्लोहितः पीतः स्फटिक इति भानवद् तत्तत्द् वर्णादिव्यङ्ग्यो पदरूपो वाक्यरूपश्च। यथा च मुखे मणिकृपाणदर्पणव्यञ्जकोपधिवशाद्दैर्घ्यवर्तुलत्वादि भानं तद्वत्। किञ्च, व्यञ्जकध्वनिगतं कत्वगत्वादिकं स्फोटे भासते। बिम्बगतधर्मवैशिष्ट्येनैव प्रतिबिम्बस्य लोकेऽवधाणात् व्यञ्जकरूपरूषितस्यैव स्फटिकादेभानाच्च। यथा चैकस्याकाशस्य घटाकाशो मठाकाश इत्यौपधिको भेदः, यथा चैकस्यैव चेतनस्यौपाधिको भेदः, यथा चैकस्यैव चेतनस्यौपाधिको जीवेश्वरभेदो जीवानाञ्च परस्परमन्तःकरणाद्युपाधिभेदः, एवं स्फोटे व्यञ्जकध्वनिगतकत्वादिभानात् ककारो बुद्ध इत्यौपाधिको भेदव्यवहारः। औपाधिको भेद इत्यत्रोपाधिः कत्वादिर्भिन्नः, उपाधेयस्तु आकाशस्फोटादिरेक एवति तात्पर्यम्। पदवाक्ययोस्सखण्डत्वपक्षे त्वन्तिमवर्णव्यङ्ग्यः स्फोट एक एव। पूर्वपूर्ववर्णस्तु तात्पर्यग्राहकः, न्यायनये चित्रगुरित्यादौ चित्रादिपदवत्। अयं भावः — यथा न्यायमते चित्रगुसमासे शक्त्यभावेऽपि गोपदस्यैव चित्राभिन्नगोस्वामिनि लक्षणया तत्स्वामिनो बोधः, चित्रपदं तात्पर्यग्राहकम्, तथा स्फोटव्यञ्जकश्चरमोवर्णः, पूर्ववर्णस्तत्तात्पर्यग्राहक इति स्फोटसिद्धान्तः। अयञ्च स्फोटसिद्धान्तो व्याकरणदर्शनस्य प्रमुखः सिद्धान्तः।

## शोधसमस्याः

"स्फोटतत्त्वनिरूपणमि"ति शीर्षकानुसारं स्फोटतत्त्वविमर्शार्थं प्रस्तुतेऽस्मिन् लेखोपस्थापनात्पूर्वं समुपस्थिताः समस्याः निम्नङ्किताः सन्ति-

क) स्फोटपदार्थः कः ?

ख) स्फोटाः कति ?

ग) मुख्यस्फोटः कः?

## शोधोद्देश्यम्

शोधसमस्यायां लिखितानां समस्यानां समाधानमेव प्रस्तुतशोधकार्यस्य मुख्यमुद्देश्यमस्ति। प्रस्तुतशोधकार्यस्य मुख्योद्देश्यानि निम्नाङ्कितरूपेण विभक्तुं शक्यते –

क) स्फोटतत्त्वनिरूपणम्।

ख) स्फोटभेदनिरूपणम्।

ग) वाक्यस्फोटस्य मुख्यत्त्वनिरूपणम्

## पूर्वकार्यसमीक्षा

वैयाकरणाः खलु स्फोटरूपस्य शब्दस्यैव ब्रह्मत्वं स्वीकुर्वन्ति। स्फोटसिद्धान्तो व्याकरणशास्त्रस्य प्रमुखः सिद्धान्तः। अत एवाचार्यैः स्फोटविषये बहुशश्चर्चितम्। तत्र नागेशमतं विशेषतो महत्त्वपूर्णं मन्यते। तथाप्यनुसन्धानक्रमे बहूनामाचार्याणां मतानि चावलोकितानि सन्ति। तत्र स्फोटविषयकविचारा बहुभिराचार्यैस्तत्तद्ग्रन्थेषु निर्दिष्टाः सन्ति, परन्तु समग्रतयैकत्र स्फोटतत्त्वस्वरूपं निर्दर्शितं नास्ति। अतोऽत्र शोधकार्यस्य एषः प्रयास आरब्धः।

## सैद्धान्तिकपर्याधारः

अस्य शोधलेखस्य सैद्धान्तिकपर्याधारः स्फोटसिद्धान्त एवास्ति। वाक्यपदीय-भूषणसार-मञ्जुषादिग्रन्थानामाधारेणैवात्र स्फोटतत्त्वनिरूपणं कृतम्। लेखोऽयं स्फोटसिद्धान्तं विषयीकृत्यैव निर्मितोऽस्तीति तस्यात्रोपस्थापनं नावश्यकम्।

विश्लेषणक्रमे सङ्कलिततथ्यानां सन्दर्भस्रोतः प्रदर्शनाय गद्यात्मकाधुनिकग्रन्थानां कृते लेखकमितिपृष्ठपद्धतेः(एपीएपद्धतेः) वेदोपनिषत्पुराणादीनां प्राचीनग्रन्थानां सन्दर्भप्रदर्शनाय च यथावश्यकं संस्कृतवाङ्मये प्रचलितायाःग्रन्थाध्याय-श्लोकसंख्यापद्धतेः,ग्रन्थ-स्कन्धाध्याय-श्लोकसंख्यापद्धतेरन्यासाञ्च सम्बद्धग्रन्थप्रकृत्य-नुरूपाणां संस्कृतवाङ्मयस्य परम्परागतमौलिकपद्धतीनां प्रयोगः कृतोऽस्ति।

## अध्ययनविधिः

शोधकार्यमिदं निष्पादयितुं प्रमुखसामग्रीसङ्कलनाय पुस्तकालयाध्ययनविधिरेवात्राङ्गीकृतो विद्यते। तत्र च वाक्यपदीयमेवास्याध्ययनस्य प्रधानं स्रोतोऽस्ति चेत् तत्ग्रन्थसम्बद्धाः व्याख्यानात्मकाः विश्लेषणात्मकाष्टीकात्मकाः समालोचनात्मका ग्रन्थास्तथा विविधस्थानात् विविधसमये प्रकाशिता तत्सम्बाद्धा आलेखाश्च सहायकसामग्रीत्वेन द्वितीयसामग्रीत्वेन वा संगृह्यन्ते। अध्ययनसौकर्याय पाठभेदादिसहिता तत्तग्रन्थसम्पादकानां टिप्पण्यादिसंवलिताः विविधप्रकाशनसंबद्धाः स्फोटसम्बद्धाः ग्रन्थाः तन्निबद्धाः ग्रन्थान्तराश्च अध्ययनेऽस्मिन् समुपयुज्यन्ते। एतावता पुस्तकाध्ययनविधिरत्रत्यो मुख्यो विधिश्चेत् यथावसर विषयविश्लेषणादिविधयश्च प्रयोगार्हा भवन्ति। एवमेव यथावश्यकं तुलना मनन-चिन्तनादिविधयस्तथा विज्ञजनैः सह परामर्शादिकं विधाय विमर्शादिविधयश्च समालम्बिताः सन्ति।

## सामग्रीसङ्कलनं तत्साधनानि च

प्रस्तुतशोधकार्यसम्पादनाय पुस्तकालयविधिना मञ्जुषाभूषणसारग्रन्थानां प्राथमिकसामग्रीरूपेण तथा मूलग्रन्थटीकादीनां द्वितीयकसामग्रीरूपेण सङ्कलनं विहितं वर्तते। तथा च महाभाष्यवाक्यपदीयादिग्रन्थाश्च सहायकसामग्रीरूपेण प्रयुक्ता विद्यन्ते।

## विषयविश्लेषणम्

अत्र वाक्यपदीयात् वैयाकरणसिद्धान्तलघुमञ्जूषेत्यादि व्याकरणदर्शनग्रन्थाद् स्फोटनिरूपणग्रन्थेभ्यश्च स्फोटसम्बद्धानि तद्विचारपराणि च तथ्याङ्कानि सङ्कलय्य तेषां वर्णनं , तोलनं विश्लेषणञ्च कृत्वा समन्वितो निष्कर्षो निष्कासितो विद्यते। मूलतोऽत्र तथ्याङ्कविश्लेषणाय तुलनाविधिः, विश्लेषणविधिः,समन्वयविधिश्चावलम्बितः।

**स्फोटविचारः**

सर्वोऽप्ययं जीवलोकः शब्देनैवाधिगतहेयोपादेयविवेको जहाति जिहासितमुपादत्ते चोपादित्सितमिति सर्वजनीनमेतत्। किं बहुना शब्दाभावे न धर्माधर्मव्यवस्था, न गुरशिष्योपदेशसंप्रदायः, न चाप्युत्तमाधमर्णव्यवहादिकमिति सर्वमेवेदं जगज्जनुषान्धमिव प्रत्यस्तमितनिखिलव्यापारमसत्कल्पतामापद्येत। यदाह कविप्रवरो दण्डिमहोदयः –

**इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्।**

**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते** (काव्यादर्शः, १।४) इति।

स चायं शब्दः प्रत्यक्षादिषु बोधौपयिकेषु प्रमाणेष्वन्यतमः परिगण्यते। यदाह मनुः –

**प्रत्यक्षमनुमानं च शास्त्रं च विविधागमम्।**

**त्रयं सुविदितं कार्यं धर्मसिद्धिमभीप्सता** (मनुस्मृतिः, १२।१०५) इति।

अत्र शास्त्रमिति शब्दप्रमाणमुच्यते। इदं च प्रमाणत्रयं वेदान्तिनां सांख्यानां च निरीश्वरसेश्वरभिन्नानामप्यभिमतम्। एतदेवोपमानेन सह चत्वारि प्रमाणानीति गौतमीयाः। प्रत्यक्षानुमानोपमानशब्देषु चतुर्षु प्रमुखप्रमाणेषु शब्दो वैयाकरणानां मुख्यं प्रमाणम्। ने केवलं प्रमाणमेव शब्दस्तेषाम्, अपितु- शब्दस्यानुशासनमेव तेषामभीष्टम्। यतो हि व्याकरणशास्त्रस्य नामैव विद्यते- शब्दानुशासनमिति। अतः शास्त्रेऽस्मिन् प्रमुखरूपेण शब्द एव विद्यते विवेच्यः। वैयाकरणमते स्फोटः एव शब्दः कथ्यते। स स्फोटश्च वस्तुतः एकः, नित्यः, विभुः अर्थात् व्यापकः, किन्तु वर्णपदवाक्यरूपात् उपाधिभेदात् स्फोटस्याष्टौ औपाधिकभेदाः भवन्ति। तत्र वर्णपदवाक्यभेदेन स्फोटस्त्रिधा। तत्रापि जातिव्यक्तिभेदेन पुनः षोढा। अखण्डपदस्फोटोऽखण्डवाक्यस्फोटश्चेति सङ्कलनयाऽष्टौ स्फोटाः।

स स्फोटसिद्धान्तः खलु वैयाकरणानां शब्दनित्यत्ववादस्य हितकर्तारो मौलिकविचारो विद्यते। स्फोटशब्दस्य सर्वप्रथमः प्रयोगो वेद एवोपलभ्यते। शतपथब्राह्मणे स स्फोटतोर्हैकः पक्षयरूपशुश्राव' इत्यभिहतम् (शतपथब्राह्मणम्, ८।१।४९)। तदनु महाभारते 'वायुस्फोटाः सनिर्घाताः' (महाभारतम् ; ३। ४२। ५) इति। उभयत्र प्रयोगे प्रकम्पनाभिघातार्थे स्फोटशब्दस्य प्रवृत्तिर्विलोक्यते। एतत्तु वस्तुगतं सत्यमेव प्रकम्पनाभिघातयोर्ध्वनिनिःसरणमिति। अतो ध्वनिः स्फोटस्य परिणामः, स्फोटे शब्दसम्बन्धश्च प्रतिफलति। हरिवंशे च अक्षराणामकारस्त्वं स्फोटस्त्वं

वर्णसंश्रयः (हरिवंशपुराणम् ; ३। ८८। ५५) इति। श्रीमभगवद्गीतायाञ्च अक्षराणामकारोऽस्मि (श्रीमभगवद्गीता ; १।३३) इत्युक्तम्। तत्र हि स्फोटशब्दो व्याकरणभसिद्धान्तसिद्धस्य स्फोटस्य कृते प्रयुक्तः। तत्र हि भगवतो विभूतिस्वरूपस्य स्फोटस्य नित्यत्वं वर्णादिध्वनिव्यङ्ग्यत्वञ्च वैयाकरणसिद्धान्तसिद्धं स्फोटमुपपादयता महभर्षिणा पाणिनिना (अवङ् स्फोटायनस्य पा.अ. ६।१।१२३) इति सूत्रं प्रणीय पूर्ववर्त्ती स्फोटसिद्धान्तप्रतिपादक आचार्यः सादरं स्मर्यते। तेन स्फोटसिद्धान्तः पाणिनेः प्रागपि सम्यग्विचारितः स्थापितश्चेति सूच्यते। विविधसन्दर्भेषु शब्दपरिभाषां कुर्वता महाभाष्यकारेण मुख्यतया चत्वारो विचाराः प्रस्तुताः प्राप्यन्ते –

(क) येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः (पतञ्जलिः,

(ख) प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते (पतञ्जलिः, २०१७, पृ. ४)।

(ग) श्रोत्रोपलब्धिबुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलित आकाशदेशः शब्दः (पतञ्जलिः, २०१७, पृ. ६५ )।

(घ) स्फोटःशब्द,ध्वनिः,शब्दगुणः (पतञ्जलिः, २०१७, पृ. ७०८)।

**अष्टानां स्फोटानामुपपत्तयः**

वर्णव्यक्तिस्फोटः, वर्णजातिस्फोटः, पदव्यक्तिस्फोटः, पदजातिस्फोटः, वाक्यव्यक्तिस्फोटः,वाक्यजातिस्फोटः, अखण्डपदस्फोटः, अखण्डवाक्यस्फोटश्चेत्यष्टविधः। अत्र तेषामष्टानामुपपत्तयः प्रस्तूयन्ते।

***वर्णव्यक्तिस्फोटः***

पदवाक्यलक्षणानाक्रान्तस्य वर्णसमूहस्य वर्णस्य वा प्रकृतिप्रत्ययरूपस्य व्याकरणेन गृहीतशक्तिकस्य पच, तिप् इत्यादिकस्य वाचकत्वे प्रकृतिप्रत्ययरूपवर्णव्यक्तिव्यङ्ग्य तत्सदृशः स्फोट वर्णव्यक्तिस्फोटः। ते च प्रयोगसमवायिनो विसर्गतिबादयो न तु तत्स्थानित्वेन कल्पिताः सकारलकारादयः। शुद्धब्रह्मज्ञानाय सर्वबहिर्भूतान्नमयकोशवदखण्डवाक्यबोधनाय वर्णस्फोटोऽभिमतः। अत्र प्रमाणम्-स्थानिवत्सूत्रे सर्वे सर्वपदादेशाः इति भाष्यग्रन्थः। पद्यते ऽर्थोऽनेनेति अर्थवदिह पद न तु सुप्तिङन्तमेव। तथा च एरूः इत्यस्य तेस्तु रित्यर्थ इति टीकाग्रन्थश्च वर्ण- स्फोटेऽनुकूलः। प्रकतिप्रत्ययघटकीभूता वर्णा अनर्थका इति न तत्र सखण्डस्फोट- व्यवहारः। अर्थात् सखण्डवर्णस्फोटः, अखण्डवर्णस्फोट इत्येव भेदो न स्वीक्रियते उक्तयुक्तेः। अयं वर्णस्फोटः एवं तार्किकाणां पदस्फोटत्वेनाभिमतः, शक्तं पदमिति तैः स्वीकृतत्वात् (झाः, २०१८, पृ. १३६)। तत्र सर्वान् स्फोटान् निरूपयन् वर्णस्फोटं प्रथमाह- साधुशब्देऽन्तर्गता हि बोधका न तु तत्स्मृताः इति (भट्टः, २०१८, पृ. ३५४)। साधुशब्दान्तर्गता वाचका न वेति विप्रतिपत्तिः। विधिकोटिरन्यषाम्, नेति वैयाकरणानाम्। साधुशब्दे ‘पचति’ ‘रामः’ इत्यादिप्रयुज्यमानेऽन्तर्गतास्तिब्विसर्गादय एव बोधकाः, तेषामेव शक्तत्वस्य प्राग्व्यवस्थापितत्वात्। न तु तैः स्मृताः लादयः स्वादयश्चेत्यर्थः।

ये तु प्रयोगान्तर्गतास्तिब्विसर्गादयो न वाचकाः, तेषां वहुत्वेन शक्त्यानन्त्यापत्तेः, एधाञ्चक्रे ब्रह्म इत्यादावादेशलुगादेरभावरूपस्य बोधकत्वासम्भवाच्च। किन्तु तैः स्मृता लकाराः, स्वादयश्च वाचकाः, लत्वस्य जातिरूपतया शक्तताऽवच्छेदकत्वौचित्याद् अव्यभिचाराच्च। आदेशानां भिन्नतया परस्परव्यभिचरितत्वात्। 'लः कर्मणि च भावे' ( पा. अ. ३।४।७९) इत्याद्यनुशासनानुगुण्याच्च। न ह्यादेशेष्वर्थवत्ताबोधकमनुशासनमुपलभामहे इत्याहुः। तान् स्वसाधकयुक्तिभिनिराचष्टे-

व्यवस्थितेर्व्यवहृतेस्तद्धेतुन्यायतस्तथा।

किञ्चाख्यातेन शत्राद्यैर्लडेव स्मार्यते यदि।

कथं कर्तुरवाच्यत्ववाच्यत्वे तद्विभावय (भट्टः, २०१८, पृ. ३५८)।

व्यवस्थानुरोधात् प्रयोगान्तर्गता एव वाचकाः, न तु तैः स्मृता इत्यर्थः। तथाहि- पचतीत्यादौ लकारमविदुषो बोधान्न तस्य वाचकत्वम्। न च तेषां तिङ्क्षु शक्तिभ्रमाद् बोधः, तस्य भ्रमत्वे मानाभावात्, आदेशिनामपि तत्तद्वैयाकरणैः स्वेच्छया भिन्नानामभ्युपगमात्, कः शक्तः को नेति व्यवस्थानापत्तेश्च। सर्वेषां शक्तत्वे गौरवम्, व्यभिचारश्चास्त्येव। आदेशानां प्रयोगान्तर्गततया नियतत्वाद् युक्तं तेषां शक्तत्वम्। तथा चादेशिष्मरणकल्पना नेति लाघवम्,। साधकान्तरमाह- व्यवहृतेरिति। व्यवहारस्तावच्छक्तिग्राहकेषु मुख्यः। स च श्रूयमाणतिङादिष्वेवेति तु एव वाचका इत्यर्थः। किञ्च तद्धेतुन्यायत इति। लकारस्य बोधकत्वे 'भू ल्' इत्यतोऽपि बोधापत्तिः स्यात्। तादृशबोधे भवतीति समभिव्याहारोऽपि कारणमिति चेत्, तर्ह्यावश्यकत्वादस्तु तादृशसमभिव्याहारस्यैव वाचकत्वशक्तिः। अन्यथा लकारस्य वाचकत्वम्, समभिव्याहारस्य कारणत्वञ्चेत्युभयं कल्प्यमिति गौरवं स्यात्। तथा च तादृशसमभिव्याहारः समभिव्याहृता वर्णा वेत्यत्र विनिगमनाविरहात् प्रयोगान्तर्गता वर्णा वाचका इति सिद्ध्यतीति भावः।

अपि च लकारस्यैव वाचकत्वे कृत्तिङोः कतृभावनावाचकत्वव्यवस्था त्वत्सिद्धान्तसिद्धा न स्यादित्याह- किञ्चेति। आदेशानां वाचकत्वे च तिङ्त्वेन भावनायां शानजादिना कर्तरि शक्तिरित्युपपद्यते विभाग इति भावः। न च शानजादौ कृतिर्लकारार्थः, आश्रयः शानजर्थ इत्यस्तु, 'कतषरि कृद्' इत्यनुशासनादिति शङ्क्यम्, स्थान्यर्थेन निराकाङ्क्षतया शानजादो कर्तरीत्यस्याप्रवृत्तेः। अन्यथा घञादावपि प्रवर्तेत। 'देवदत्तः पचमानः' इत्यादिसमानाधिकरण्यानुरोधाच्छानचः कर्ता वाच्यः स्यादित्याशङ्क्याह –

तरबाद्यन्ततिङ्क्ष्वस्ति नामता कृत्स्विव स्फुटा।

नामार्थयोरभेदोऽपि तस्मात्तुल्योऽवधार्यताम् (भट्टः, २०१८, पृ. ३५८) इति।

'पचतितरां मैत्रः' 'पचतिकल्पं मैत्रः' इत्यादिषु नामार्थत्वाभेदान्वययोः सम्भव एवेति कर्तृ वाचकता स्यादिति भावः। न च पचतिकल्पमित्यत्र सामानाधिकरण्यानुरोधात् कर्तरि लक्षणा, 'पचमानः'इत्यत्राप्यापत्तेरिति। 'लः कर्मणी'त्यनुशासनञ्च लाघवात् कल्पिते लकारे कर्त्रादिवाचित्वं कल्पितमादायेत्युक्तम्।

**सखण्डपदव्यक्तिस्फोटः**

रामः, रामेण, रामायेत्यादौ परिनिष्ठिते रूपे क्रियानंशो द्रव्यादिवाचकः, क्रियांश्च कर्मत्वादेरित्यस्य विनिगन्तुमशक्यतया राममित्यादि परिनिष्ठितं पदमेव वाचकम् कर्मत्वादिविशिष्टस्येति पदस्फोटपक्षः। तत्र सुबन्ततिङन्त-तदादिघटकप्रकृतिप्रत्ययरूपवर्णाभिव्यक्तस्फोटेनार्थप्रतीतौ सखण्डपदव्यभिस्फोटः, यथा पाचकः औपगवः। अत्र प्रमाणम् पस्पशाह्निके अथ गौरित्यत्र कः शब्द इत्युपक्षिप्य येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्द इति भाष्यम्। नित्येषु नामशब्देषु कूटस्थैरविचालिभिर्वर्षणैर्भवितव्यम् इति भाष्योक्तिश्च पदस्फोटस्य सखण्डत्वे मानम्। शक्तं पदमिति मते स एव वाक्यस्फोटस्तार्किकाणाम् (झाः, २०१८, पृ. ३६)। पदस्फोटविषये वैयाकरणभूषणसारेणोक्तम्-

अथादेशा वाचकाश्चेत् पदस्फोटस्ततः स्फुटः (भट्टः, २०१८, पृ. ३६३) इति।

आदेशानां वाचकत्वे सिद्धे पदस्फोटोऽपि सिद्ध एवेति बोधयितुं अथेत्याद्युक्तम्। आदेशाः तिब्विसर्गादयः। अयं भावः-समभिव्याहृतवणार्णानां वाचकत्वे सिद्धे तादृशवर्णसमभिव्याहाररूपपदस्य वाचकता सिद्ध्यति, प्रतिवर्णदर्थस्मरणस्यानुभवविरुद्धत्वात्, प्रत्येकं वर्णानामर्थवत्वे प्रातिकदिकत्वापत्ति 'नलोपः प्रातिपदिकान्तस्य' इत्यादिभिः 'धनम्' 'वनम्' इत्यादौ नलोपाद्यापत्तिश्च। एतच्च चरमवर्ण एव वाचकत्वशक्तिः, शक्तेर्व्यासज्यवृत्तित्वे मानाभावात्। पूर्वपूर्ववर्णानुभवजन्यसंस्काराश्चरमेणार्थधीजनने सहकारिण इति न तन्मात्रोच्चारणादर्थधीरिति वर्णस्फोटवादीनां मतान्तरस्य दूषणायोक्तम्। 'रामोऽस्ती'ति वक्तव्ये(राम्) इत्यनन्तरं घटिकोत्तरमोकारोच्चारणेऽर्थबोधापत्या तादृशानुपूर्व्यैव शिताऽवच्छेदकत्वौचित्यादिति। 'सप्तिङन्तं पदम्' इति पारिभाषिकपदस्य वाचकत्वस्वीकर्तृणां मतमाह –

**घटेनेत्यादिषु न हि प्रकृत्यादिभिदा स्थिता।**

**वस्नसादाविवेहापि सम्प्रमोहो हि दृश्यते**। (भट्टः, २०१८, पृ. ३६३) इति।

घटेनेत्यादौ 'घटे' इति प्रकृतिः , 'न' इति प्रत्ययः, 'घट्' इति प्रकृतिः, 'एन' इति प्रत्यय इति विभागस्य 'सर्वे सर्वपदादेशाः' इति स्वीकारे विशिष्य प्रकतिप्रत्यययोज्ञानासम्भवान्न वाचकत्वमित्यर्थः। वैयाकिणैर्विभागः सुज्ञेय इत्यतो दृष्टान्तव्याजेनाह-वस्नसादाविति। 'वहुवचनस्य वस्नसौ' इति समुदायस्याऽदेशविधानान्नात्र तद्विभागः सम्भवतीत्यर्थः।

**सखण्डवाक्यव्यक्तिस्फोटः**

सर्वप्रथमं व्यवहारो वाक्ये एव शभिग्रहात् वाक्यमेव वाचकं वाक्यार्थस्येति वाक्यस्फोटपक्षः। तत्र सुबन्ततिङन्तपदजन्यबोधपूर्वक- वाक्याभिव्यक्तस्फोटस्य बोधकत्वे सखण्डवाक्यव्यभिस्फोटः, यथा गाः बधान, गाः नय इत्यादि। वाक्यस्फोटसत्त्वादेव समासग्रहणं वाक्ये प्रातिपदिकसञ्ज्ञाभतिव्याप्तिवारणार्थमिति भाष्यं संगच्छते (झाः, २०१८, पृ. ३६)।

सुप्तिङन्तचयरूपवाक्यस्यापि तदाह –

**हरेऽवेत्यादि दृष्ट्वा च वाक्यस्फोटं विनिश्चिनु। अर्थे विशिष्यसम्बन्धाग्रहणं चेत् समं पदे।। लक्षणादधुना चेत्तत्पदेऽर्थेऽत्यस्तु तत् तथा** (भट्टः, २०१८, पृ. ३६३) इति।

'हरेऽव' 'विष्णोऽव' इत्यादौ पदयोः 'एङः पदान्तादति' इत्येकादेशे सति न तद्विभागः सुज्ञानः। तथा च प्रत्येकं पदाज्ञानेऽपि समुदायशक्तिज्ञानाच्छाब्दबोधात् समुदायेऽप्यावश्यकी शक्तिः। एवञ्च प्रकृतिप्रत्ययेषु विशिष्याज्ञायमानेष्वपि समुदायव्युत्पत्त्या बोधात् तत्राप्यावश्यिकैव शक्तिरिति भावः। वस्तुतः पदैः पदार्थबोधवत् वाक्येन वाक्यार्थबोध इति पदार्थशक्तिः पदेभष्विववाक्यार्थशक्तिर्वाक्येऽभ्युपेयेति पदस्फोटवाक्यस्फोटौ व्यवस्थितौ। अन्यथा 'घटः कर्मत्वमानयनं कृतिः' इत्यादी तादृशव्युत्पत्तिरहितस्यापि बोधप्रसङ्गः। 'घटमानय' इत्यत्रेव पदार्थानामुपस्थितौ सत्यपि तात्पर्यज्ञाने बोधाभावाच्च। तत्रैव घटकर्मकमानयनमिति बोधे घटार्थकप्रातिपदिकोत्तर कर्मत्ववाचकविभक्तस्ततो धातोस्तत आख्यातस्य समभिव्याहारः कारणमिति कार्यकारणभावज्ञानवतो बोधात्तज्ज्ञानमपि हेतुरिति चेत्तर्हि सिद्धो वाक्यस्फोटः।

**अखण्डपदव्यक्तिस्फोटः**

एकः पट इतिवदेकं पदमित्यबाधितप्रतीत्या वर्णातिरिक्तमेव पदमखण्डं वर्णव्यङ्ग्यम्। अखण्डेष्वपि ऋकारादिषुवर्णेषु वर्णान्तरसमानाकारैकदेशावभासो यथा, तथाऽत्र पक्षे वर्णावभासः प्रकृ तिप्रत्ययजन्यबोधाभावे सति पदस्फोटेन बोधे अखण्डपदव्यभिस्फोटः। अयं स्फोटश्च सर्वैः पदस्थितवर्णैः व्यज्यते। यथा घटः इत्यत्र घकारादिध्वनिचतुष्टयाभिव्यक्तो घटस्फोटः। यौगिकं योगरूढं च पदम् सखण्डपदस्फोटत्वेन, रूढ पद मणिन्पुरादि, व। नः इत्यादि चाखण्डपदस्फोटत्वेनाभिमतम्। अत्र मानन्तु सरूपसूत्रभाष्ये एक इन्द्रशब्दोऽनेकेषु क्रतुष्वाविर्भवति इत्यत्र इन्द्रशब्दार्थमेकशब्दप्रयोगः। अपि च येनोच्चारितेनेति भाष्यप्रतीकमादाय वैयाकरणा वर्णव्यतिरिक्तस्य पदस्य वाक्यस्य वा वाचकत्वमिच्छन्ति इति प्रदीपकारोक्त वर्णव्यतिरिक्तस्येति कथनम्। मीमांसकास्तु पदस्य वाक्यस्य च वर्णात्मकत्वात् सखण्डत्वमेव मन्वते। भर्तृहरिः पदे न वर्णा विद्यन्ते इत्यादि कारिकाप्यत्र मानम्। अखण्डपक्षमाह-

**पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च।**

**वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन** (भट्टः,२०१८,पृ.३७४) इति।

पदे- पचतीत्यादौ, न वर्णाः, नातो वर्णसमूह पदमिति शेषः। दृष्टान्तव्याजेनाह- वर्णेष्विति। एकारौकारऋकारादिवर्णेश्चवयवाः प्रतीयमाना अपि यथा नेत्यर्थः। एवं वाक्येऽप्याह- वाक्यादिति। पदानामपि वाक्याद्विवेक भेदो नास्तीत्यर्थः। अयं भावः- वाक्यं पदञ्चाखण्डमेव, न तु वर्णसमूहः, अनन्तवर्णकल्पने मानाभावात्। तत्तवर्णोत्पादकत्वेनाभिमतवायुसंयोगनिष्ठं तत्तवर्णजनकताया व्यञ्जकताया वाऽवच्छेदकं वैजात्यमादायैव ककारो गकार इत्यादिप्रतीतिवैलक्षण्यसम्भवात्। स्पष्टं हि भामत्याम्- 'तारत्वादि वायुनिष्ठं वर्णेष्वारोप्यते' इत्युक्तं देवताधिकरणे। न

चैवं वायुसंयोग एव वाचकोऽपि किं न स्यादिति वाच्यम्, प्रत्यक्षोपलभ्यमानककारादेरेव वाचकत्वस्यानुभूतिसिद्धत्वात् । तथा च वाचकत्वान्यथानुपपत्त्या तदेवेदं पदम् 'तदेवेदं वाक्यम्' 'सोऽयं गकारः' इति च स्फोटोऽखण्डः सिद्ध्यति। एतेन गौरित्यादौ गकारौकारविसर्गादिव्यतिरेकण स्फोटाननुभवाच्श्रूयमाणवर्णानामेव वाचकत्वमस्तीत्यपास्तम्। तेषां स्फोटातिरिक्तत्वात्। यत्तु वर्णानां प्रत्येकं वाचकत्वे प्रत्येकादर्थबोधापत्तिः। समुदायस्य तु क्रमवतामाशुतरोत्पन्नानां तथैवाभिव्यक्तानां वा ज्ञानसम्भाव्यमेव। पूर्वपूर्ववर्णानुभवसंस्कार सहकारेणैकदा समूहालम्बनरूपसकलज्ञानसम्भवस्तु सरो रसः, राज-जरा, नदी-दीनादि साधारण इत्यतिप्रसङ्ग इति स्फोट एवाखण्डो नादाभिव्यङ्ग्यो वाचक इति कैयटः, तत्तुच्छम्, पदज्ञानसम्भवस्योपपादितत्वात्, वर्णानां प्रत्येकं व्यञ्जकत्वं समुदितानां वेत्यादिविकल्पग्रासाच्च।

ननु त्वन्मतेऽप्येष दोषः। तत्तत्वर्णोत्पादकत्त्वेनाभिमतवायुसंयोगानां प्रत्येकं व्यञ्जकत्वं समुदितानां वेति विकल्पस्य सभावादिति चेद्, उच्यते- प्रत्येकमेव संयोगाभिव्यञ्जकाः, परन्तु केचिद् गत्वेन, केचिदौत्वेन, केचिद्विसर्गत्वेनेत्यनेकैः प्रकारैः। अत एव वर्णानां तदतिरेकास्वीकारोऽप्युपपद्यते। एवञ्चाव्यवहित्वतरत्वसम्बन्धेन घवत्त्वं टकारे गृह्यते। एतादृशपदज्ञानकारणताया अविवादात्। परन्त्वव्यवहितोत्तरत्वं स्वज्ञानाधिकरणक्षणोत्पत्तिकज्ञानविषयत्वं वाच्यम्। अत एव घटज्ञानानन्तरटज्ञानविषयत्वरूपानुपूर्वीत्यादिनैयायिकवृद्धानां व्यवहारः। एवञ्च न कश्चिद्दोषः। एतेन पर्यायस्थलेष्वेक एव स्फोटो नाना वा ? नाद्यः, घटपदे एव गृहीतशक्तिकस्य कलशादेबोधप्रसङ्गात्। न च तत्पर्यायाभिव्यक्त शक्तिग्रहस्तत्पर्यायश्रवणेऽर्थधीहेतुरितिवाच्यम्, एवं सति प्रतिपर्याय शक्तिग्रहावश्यम्भावेन तत्तत्पर्यायगतशक्तिग्रहहेतुताया उचितत्वात्। तथा सति शक्तिग्रहत्वेनैव हेतुत्वे लाघवात्। अन्यथा तत्पर्यायाभिव्यक्तगतशक्तिग्रहत्वेन तत्त्वे गौरवात्। न द्वितीयः, अनन्तपदानां तेषां शक्तिञ्चापेक्ष्य क्लृप्तवर्णेष्वेव शक्तिकल्पनस्य लघुत्वादिति परिमलोक्तमपास्तम्। पर्यायेष्वनेकशक्तिस्वीकारस्य सर्वसिद्धत्वात्, तदवच्छेदकानुपूर्व्याः, प्रागुपपादनात्। शब्दकौस्तुभे तु वर्णमालायां पदमिति प्रतीतेवर्णातिरिक्त एव स्फोटः। अन्यथा कपालातिरिक्तघटाद्यसिद्धिप्रसङ्गश्चेति प्रतिपादितम्। नन्वेवं शास्त्रस्याप्रामाण्यप्रसङ्गः, पदस्याखण्डत्वात्, शास्त्रस्य च प्रकृतिप्रत्ययाभ्यां पदव्युत्पादनमात्रार्थत्वाभदित्याशङ्कां समाधत्ते दीक्षितकारिकां समुद्धरन् कौण्डभट्टः-

**पञ्चकोशादिवत्तस्मात् कल्पनैषा समाश्रिता।**

**उपेयप्रतिपत्यर्था उपाया अव्यवस्थिताः** (भट्टः, २०१८, पृ. ३७४) इति।

'उपेयप्रतिपत्यर्था' इत्यन्तेनान्वयः। अयं भावः- यथा भृगुवल्याम् भृगुर्वै वारुणिर्वरुणं ब्रह्म पृष्टवान्। स उवाच 'अन्नम्' इति। तस्योत्पत्त्याभदिकं बुद्ध्वा पृष्टे प्राणमनोविज्ञानाऽनन्दात्मकपञ्चकोशोत्तरं ब्रह्मपुच्छ प्रतिष्ठा इति ज्ञेयं ब्रह्म प्रतिपादितम्। तत्र कोशपञ्चकव्युत्पादनं शुद्धब्रह्मबोधनाय। यथा वा आनन्दवल्लीस्थपञ्चकोशव्युत्पादनं वास्तवशुद्धब्रह्मबोधनाय। एवं प्रकृतिप्रत्ययादिव्युत्पादनं वास्तवस्फोटव्युत्पादनायैवेति। ननु प्रत्यक्षस्य स्फोटस्य

श्रवणादितोऽपि बोधसम्भवात् न शास्त्रं तदुपाय इत्यत आह उपाय। इति। उपायस्योपायान्तरादूषकत्वात्। तथा च व्याकरणाभ्यासजन्यज्ञाने वैजात्यं कल्प्यते। मन्त्रजन्यमिवार्थस्मरणे। वेदान्तजन्यमिव ब्रह्मज्ञाने। तस्य च ज्ञानस्य यज्ञादीनामन्तःकरणससुद्धाविव शरीरादिशुद्धावुपयोगः, साक्षात्परम्परया वा स्वर्गमोक्षादिहेतुत्वञ्च। तदुक्तं वाक्यपदीये-

तद्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्। पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते ॥

इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्। इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः।

अत्रातीतविपर्यासः केवलामनुपश्यति (वा.प. ; १। १४-१७) इति।

न चालीकया प्रकृतिप्रत्ययकल्पनया कथं वास्तवस्फोटबोधः ? तस्या अलीकत्वासिद्धेः। एवं 'रेखागवयन्यायः' आदिपदेन गृह्यते। ननु स्फोटस्य वर्णजातीनाञ्च नित्यतया 'ककार उत्पन्न' इति न स्यात्। वायुसंयोगनिष्ठजातेः स्फोटे भाने कादिप्रतीतीनां भ्रमत्वापत्तेश्चेत्यत आह-

कल्पितानामुपाधित्वं स्वीकृतं हि परैरपि ।
स्वरदैर्घ्याद्यपि ह्यन्ने वर्णेभ्यो न्यस्य मन्वते (भट्टः, २०१८, पृ.३७४) इति।

स्वीकारस्थलमाह- स्वरदैर्घ्याद्यपीति। आदिनोत्पत्तिविनाशसङ्ग्रहः। उदात्तत्वादि न वर्णनिष्ठम, तस्यैकत्वात् नित्यत्वाच्च। तच्च स एवायमिति प्रत्यभिज्ञानात्। न च गत्वावच्छिन्नप्रतियोगिताकभेदाभावस्तद्विषयः। व्यक्त्यशाभेदस्यापि भासमानस्य विना बाधकं त्यागायोगात्। न चोत्पत्तिर्प्रतीतिबाधिका, प्रागसत्त्वे सति सत्त्वरूपाया उत्पत्तेर्वर्णेष्वनुभवविरुद्धत्वात्। अत एव वर्णमुच्चारयतीति प्रत्ययः, न तूत्पादयतीति प्रत्ययो व्यवहारश्च। उच्चरितत्वञ्च ताल्वोष्ठसंयोगादिजन्याभिव्यक्तिविशिष्टत्वम्। किञ्च व्यञ्जकध्वनिनिष्ठोत्पत्त्यादेः परम्परया वर्णनिष्ठत्वविषयत्वेनाऽप्युपपत्तिर्न साऽतिरिक्तवर्णसाधिका। परम्परया वर्णनिष्ठत्वाभ्युपगमाच्च न भ्रमत्वम्। साक्षात्सम्बन्धांशे भ्रम इत्यवशिष्यते। तदपि सोऽयमित्यत्र व्यक्त्यभेदांशे तव भ्रमत्ववत्तुल्यम्। किन्तु ममातिरिक्तवर्णतत्प्रागभावध्वंसकल्पना नेति लाघवमतिरिच्यते। न च वर्णस्थले ध्वनिसत्त्वे मानाभावः, तदुत्पादकशङ्खाद्यभावेन तदसम्भवश्चेति वाच्यम्, ककाराद्युच्चारणस्थले तत्तत्स्थानस्य जिह्वाया ईषदन्तरपाते वर्णानुत्पत्तेध्वन्युपत्तेश्चदर्शनात्, जिह्वाभिघातजवायुकण्ठसंयोगादेर्ध्वनिजनकत्वकल्पनात्। तस्य च वर्णोत्पत्तिस्थलेऽपि सत्त्वात्वैव प्रतिबध्यप्रतिबन्धकभावकल्पना निष्प्रामाणिकी स्यादिति विपरितगौरवम्। एवं परस्परविरोधादुदातत्वानुदात्तत्वह्रस्वत्वदीर्घत्वादिकमपि न वर्णनिष्ठं युक्तमिति तेषामभिप्रायः। एवञ्चोत्पत्यादिप्रतितीनां तत्प्रमात्वस्य च निर्वाहः परेषामपि समानमिति प्रतिबन्द्यैवोत्तरमिति भावः।

**अखण्डवाक्यव्यक्तिस्फोटः**

प्रथमव्युत्पत्तेः व्यवहाराधीनतयासम्पूर्णस्यवाक्यस्य विशिष्टेऽर्थे प्राथमिकः शक्तिग्रहः। स एव चैकादेशादिस्थले विनिगमनाविरहेण कैश्चित् पिरूपादिस्थले पूर्वलोपाद्यभ्युपगमेन च व्याकरणाना कलहे सति अवयवशक्तेर्दुरुपपादतया

प्रमारूपः स्वीकार्य इत्यखण्डमेव वाक्य पदातिरिक्तम्। तथाहि पदजन्यबोधाभावे सति वाक्यरूपव्यक्तिव्यङ्ग्येन तत्सदृशेन वाक्यस्फोटेन बोधेऽखण्डवाक्य व्यक्तिस्फोटः। वाक्येऽखण्डत्वञ्चापृथगुपस्थितिजनकत्वम्। उदाहरणं च दध्यानय, हरेऽव, विष्णोऽवेत्यादि।

**वर्णजातिस्फोटः**

अनन्ताना वर्णानां वाचकत्वकल्पनापेक्षया तन्निष्ठाया जातेरेव वाचकत्वकल्पने लाघवमिति वर्णजातिस्फोटपक्षः। यथा अनन्तासु गोव्यक्तिषु शक्तिकल्पनापेक्षया लाघवेन गोपदस्य गोत्वे शक्तिकल्पनम्। प्रकृतिप्रत्ययादिगतजाति व्यङ्ग्यः स्फोटो वर्णजातिस्फोटः। यथा पच्त्वतित्यादिजातयः। जातिस्फोटस्वीकारे ऐऔच् इतिसूत्रस्थ भाष्यं मानम्। स्फोटमात्रं निर्दिश्यते, रश्श्रुतेलं श्रुतिर्भवतीति। अत्र जातिस्फोटो विवक्षत इति कैयटः। अत्र जातिश्चानुगता तत्तदाकृतिरूपा ग्राह्या। वर्णजातयश्च यथा ककारखकारादौ कत्वखत्वादिरूपाः। जातिस्फोटमाह-

**शक्यत इव शक्तत्वे जातेलघेवमीक्ष्यताम्।**

**औपाधिको वा भेदोऽस्तु वर्णानां तारमन्दवत्** (भट्टः,२०१८,पृ.३९२) इति।

अस्याशयः- वर्णास्तावदावश्यकाः। उक्तरीत्या च 'सोऽयं गकारः' इतिवद् योऽयं गकारः श्रुतः, 'सोऽयं हकारः' इत्यपि स्यात् , स्फोटस्यैकत्वात्, 'गकारोऽयं न हकार' इत्यनापत्तेश्च। किञ्च स्फोटे गत्वाद्यभ्युपेयं न वा ? आद्य तदेव गकारोऽस्तु। वर्णनित्यतावादिभिरतिरिक्तगत्वानङ्गीकारात्। तथा चातिरिक्तस्फोटकल्पने एव गौरवम्। अन्त्येगकारादिप्रतीतिविरोधः। वायुसंयोगवृत्ति, ध्वनिवृत्ति वा वैजात्यमारोप्य तथा प्रत्यय इति चेन्न, प्रतीतेविना बाधक भ्रमत्वायोगात्। अस्तु वा वायुसंयोग एव गकारोऽपि। तस्यातीन्द्रियत्वं दोष इति चेद्धर्मवदुपपत्तेरिति कृतं स्फोटेन। तस्मात् सन्त्येव वर्णाः, परन्तु न वाचकाः, गौरवात्, आकृत्यधिकरणन्यायेन जातेरेव वाच्यत्ववद्वाचकत्वस्यापि युक्तत्वाच्च। इदं हरिपदमित्यनुगतप्रतीत्या हर्युपस्थित्वावच्छेदेन हरिपदज्ञानत्वेन हेतुत्वातदवच्छेदकतया च जातिविशेषस्यावश्यकल्प्यत्वात्। न च वर्णानुपूर्व्येव प्रतीत्यवच्छेदकत्वयोनिर्वाहः, घटघटत्वादेरपिसंयोगविशेषविशिष्टम्रदाकारादिभिश्चान्यथासिद्धयापत्तेः। तस्मात् सा जातिरेव वाचिका, तादात्म्येनावच्छेदिका चेति। ननु सरो रस इत्यादौ तयोर्जात्योः सत्त्वादर्थबोधभेदो न स्यादित्यत आह- औपाधिको वेति। वा त्वर्थे उपाधिरानुपूर्वी, सैव जातिविशेषाभिव्यञ्जिकेति भेदः, करणीभूतज्ञानस्येति नातिप्रसङ्ग इति भावः। उपाधिप्रयुक्तज्ञानवैलक्षण्ये दृष्टान्तमाह वर्णानामिति। ननु जातेः प्रत्येक वर्णेष्वपि सत्त्वात् प्रत्येकादर्थबोधापत्तिः स्यादित्यत आह –

**अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोटः इति स्मृता।**

**कैश्चिद् व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिताः** (भट्टः, २०१८, पृ. ३९६) इति।

अनेकाभिर्वर्णव्यक्तिभिरभिव्यक्तैव जातिः स्फोट इति स्मृता, योगार्थतया बोधिकेति यावत्। एतेन स्फोटस्य नित्यत्वात्सर्वदार्थबोधापत्तिरित्यपास्तम्। अयं भावः —यद्यपि वर्णस्फोटपक्षे उक्तदोषोऽस्ति। तथापि पदवाक्यपक्षयोर्न, तत्र तस्या व्यासज्यवृत्तित्वस्य धर्मिग्राहकमानसिद्धत्वादिति कश्चिद् व्यक्तयो ध्वनय एव ध्वनिवर्णयोर्भेदाभावादित्यभ्युपेयन्ते इति शेषार्थः। उक्तं हि काव्यप्रकाशे 'बुधैर्वैयाकरणैः प्रधानीभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः'। ननु का सा जातिस्तत्राह-

**सत्यासत्यौ तु यौ भागौ प्रतिभावं व्यवस्थितौ।**

**सत्यं यत्तत्र सा जातिरसत्या व्यक्तयो मताः** (भट्टः, २०१८, पृ. ३९७) इति।

प्रतिभावं प्रतिपदार्थम्। सत्यांशो जातिः, असत्या व्यक्तयः। तत्तद्व्यक्तिविशिष्टेब्रह्मैव जातिरिति भावः। उक्तञ्च कैयटेन- 'असत्योपाध्यवच्छिन्न ब्रह्मतत्त्वं द्रव्यशब्दवाच्यमित्यर्थः इति। ब्रह्मतत्त्वमेव शब्दस्वरूपतया भाति इति च। कथं तर्हि ब्रह्मदर्शने च गोत्वादिजातेरप्यसत्त्वादनित्यत्वम्, 'आत्मैवेदं सर्वम्' इति श्रुतिवचनादिति कैयट सङ्गच्छताम्। अविद्या आविद्यको धर्मविशेषो वेति पक्षान्तरमादायेति द्रष्टव्यम्। तमेव सत्यांशे स्पष्टयति-

**इत्थं निष्कृष्यमाणं यच्छब्दतत्त्वं निरञ्जनम्।**

**ब्रह्मैवेत्यक्षरं प्राहुस्तस्मै पूर्णात्मने नमः** (भट्टः, २०१८, पृ. ३९८) इति।

अयं भावः- 'नामरूपे व्याकरणवाणी'ति श्रुतिसिद्धा द्वयी सृष्टिः। तत्र रूपस्येव नाम्नोऽपि तदतत्त्वम् प्रक्रियांशस्त्वविद्याविजृम्भणमात्रम्। उक्तञ्च वाक्यपदीये- शास्त्रेषुप्रक्रियाभेदैरविद्यैवोपवर्ण्यते। समारम्भस्तु भावानामनादि ब्रह्म शाश्वतम् इति। ब्रह्मैवेत्यनेन 'अत्रायं पुरुषः स्वयञ्ज्योतिः' 'तमेव भान्तमनुभाति सर्वम्' 'भासा सर्वमिदं विभाति' इति श्रुतिसिद्धस्वपरप्रकाशत्वं सूचयन् स्फुटत्यर्थोऽस्मादिति स्फोट इति यौगिकस्फोटशब्दभिधेयत्वं सूचयति (भट्टः, २०१८, पृ. ३९८) इति।

### पदजातिस्फोटः

अनेकपदानां वाचकत्वकल्पनापेक्षया पदनिष्ठजातेरेव वाचकत्वमिति सुबन्ततिङन्तपदगतजातिव्यंग्यः स्फोट पदजातिस्फोटो यथा घटपदगोपदादौ घटपदत्व गोपदत्वादिजातिः। अत्र वर्णानामाशुविनाशित्वाद् वर्णसमुदायरूपे पदे पदत्वजातिर्व्यषज्यत इति भावः। पदजातिस्फोटे च सिद्धे शब्दार्थसम्बन्धे इत्यस्य भाष्य प्रमाणम्। तदुक्तम्- आकृतावपि पदार्थ एव विग्रहो न्याय्यः। सिद्धे शब्दे अर्थ सम्बन्धे चेति। आकृतिपदेनात्र जातिर्गृह्यत – इत्युद्योतः (झाः, २०१८, पृ.१३७)।

### वाक्यजातिस्फोटः

वाक्यगतजातिव्यङ्ग्यस्फोटो हि वाक्यजातिस्फोटः। तथाहि देवदत्त ग्रामभ्याज शुक्ला दण्डेन इत्यादिपदसंघातरूपेषु वाक्येषु अस्ति कश्चन प्रतिवाक्यं भिद्यमानो जातिविशेषः, येन प्रतिपुरुष प्रत्युच्चारणं प्रतिक्षणं

भिद्यमानेऽपि वाक्ये एकत्वप्रत्यभिज्ञा भवति। भिद्यमाने पदसंघाते वाचकत्वं न संभवति, शक्तेरानन्त्यव्यभिचारदोषप्रसङ्गात्। अतः पदसंघातगताया जातेरेकस्या एव वाचकत्वमिति समायाति वाक्यजातिस्फोटः। तद्यथा गामानयेत्यत्र गामानयवाक्यत्वजातिः। अक्षरं न क्षरं विद्यात् इति भाष्ये तच्च ब्रह्मतत्त्वं परमार्थतो नित्यम्, व्यवहारनित्यतया तु वर्णपदवाक्यस्फोटानां जातिस्फोटस्य वा इति कैयटवचनमत्र प्रमाणम्।

नव्यास्तु जातिस्फोटं नेच्छन्ति। तथा हि- वर्णानामानन्त्यात् उत्पादविनाशशालित्वाच्च तत्समूहे पदे वाक्ये च शक्तिग्रहासम्भवेनन हि अनुभवविसंवादिन्यपि जातिशक्तिः कल्प्यते। तत्तु कल्पनं वृथा। ब्रह्मण एकस्यैव परमार्थसत्त्वेन तद्भिन्नानां पदवाक्यरूपाणां शब्दव्यक्तिनामाविद्यकत्वात् तन्निष्ठायाः जातेरपि आविद्यकत्वाविशेषात् अनित्यत्वं तुल्यम्। अत एव अपागादग्नेरग्नित्वात् इति श्रुतौ अग्नित्वस्य नाश उक्तः। तथा च तत्तदुपाध्यवच्छिन्नः स्फोटः व्यभिपदेनोच्यते। तत्तदुपाध्युपलक्षितो जातिपदेनोच्यते। परं तु जात्यङ्गीकारे सा पदार्थान्तरम्। उपाध्यङ्गीकारे तु नेति तत्तदुपाध्यवच्छिन्नव्यक्तावेव शक्तत्वकल्पने लाघवम्। अतो जातिस्फोटो नाङ्गीकरणीय इति वदन्ति (झाः, २०१८, पृ.१३७)।

## वाक्यस्फोटस्यमुख्यत्त्वम्

तत्र वाक्यस्फोटो मुख्यः, तस्यैव लोकेऽर्थबोधकत्वात्तेनैवार्थसमाप्तेश्चेति। तदाह न्यायभाष्यकारः पदसमूहो वाक्यमर्थसमाप्तौ इति ( झाः, २०१८, पृ. १४०)। अस्य समर्थमिति शेषः। अष्टौ स्फोटा इति उक्तम्। ते सर्वे अपि वैयाकरणसिद्धान्त सिद्धाः, तथापि तेषु वर्णपदवाक्यस्फोटेषु वाक्यस्फोटस्य लोकव्यवहारतो मुख्यत्वम्, अन्यस्य वर्णस्फोटस्य पदस्फोटस्य च अप्रधानत्वम् इति युभिप्रमाणाभ्याम् अत्र प्रतिपाद्यते। सर्वेषु स्फोटेषु वाक्यस्फोट एव वस्तुतः प्रधानः भवति, कथन्तु व्यवहारे वाक्यम् एव अर्थबोधकम् अस्ति, अपि च वाक्येन एव अर्थबोधः पूर्णःभवति। अत्र व्याकरणेतरदर्शनस्य अपि सम्मतिरस्ति। यथा हि वात्स्यायनेनन्यायभाष्यकृता उक्तं पदसमूहो वाक्यमर्थसमाप्तौ। अर्थात् पदसमूहरूपं वाक्यम् पूर्णतया अर्थबोधने समर्थम् अर्थात् शक्तिसम्पन्नं भवति। वाक्यस्फोटस्य मुख्यत्वं पूर्वोक्तेषु अष्टसु स्फोटेषु वाक्यस्फोट एवं शब्दतत्त्वविदा तात्पर्यम्। तत्रापि वाक्यजातिस्फोटे, स्फुटति प्रकाशतेऽर्थोऽस्मादिति स्फोटोऽर्थाद् वाचकः। तथा च वाक्यस्फोटो नाम वाक्यं वाचकमित्यर्थः। प्रकृते वाक्यस्फोट इत्यत्र वाक्यशब्देन पदसमूहरूपस्य वाक्यस्य ग्रहणम्, लोके तस्यैव प्रयोगात्।

यद्यपि सिद्धान्ते आभ्यन्तरः स्फोटो वाचकः, बाह्यस्य पदसमूहरूपवाक्यस्य न वाचकत्वम्, तथापि तत्तादात्म्यापन्नत्वेन बाह्यस्यापि वाचकत्वं बोद्ध्यम्। वाक्यस्फोटस्य मुख्यत्वे हेतुद्वयम्- लोके अर्थबोधकत्वात्, अर्थसमाप्तेश्चेति। प्रथमव्युत्पत्तेर्व्यवहाराधीनतया सम्पूर्णस्य वाक्यस्य विशिष्टेऽर्थे प्राथमिकः शक्तिग्रहः। स एव चैकादेशादिस्थले विनिगमनाविरहेण अवयवशक्तेर्दुरुपपादतया प्रमारूपः स्वीकार्यः। उक्तं च हरिणा –

**ब्राह्मणार्थो यथा नास्ति कश्चिद् ब्राह्मणकम्बले।**

**देवदत्तादयो वाक्ये तथैव स्युरनर्थकाः (वा.प.,२;१४)।**

तथाहि लोकव्यवहारे वाक्ये एव प्राथमिकशक्तिग्रहात्, तस्यैव च प्रमारूपत्वात् वाक्यस्फोटस्य मुख्यत्वमायाति। वृद्धव्यवहाराद्धि शब्दस्यार्थे व्युत्पद्यन्ते व्युत्पित्सवः। तत्र पदस्य वर्णस्य वा केवलस्थ प्रयोगो न दृश्यते, व्यवहारानङ्गत्वात्। वाक्यन्तु प्रयोगार्हमिति तत्रैव व्युत्पत्तिः, तत एव चार्यसम्प्रत्ययः इति बोद्ध्यम्। प्रविश पिण्डीम् इत्यादौ पदस्याप्यर्थबोधकत्वं लोके दृश्यत इत्यतो द्वितीयो हेतुरूपन्यस्तः तेनैवार्थसमाप्तेश्चेति। निराकाङ्गस्य वाक्यार्थस्य वाक्यादेव ज्ञानेन वाक्येनैव वाक्यार्थस्य पूर्णत्वादित्यर्थः। तथा च प्रविशु, पिण्डीमित्यादौ वाक्यस्मरणद्वारैव बोधो न पदमात्रात्। यद्यपि स्वमते गर्भीकृतकारकं प्रविश इति पदम्, गर्भीकृतक्रियं पिण्डीमिति पदमपि वाक्यम्, तत एव निराकाङ्क्षार्थप्रतीतेः। अत एव माणवक माणवक त्वमभिरूपः इत्यत्र क्रियाभावेऽपि वाक्यादित्वाद् द्वित्वसिद्धिः। अर्थः अर्थात् अर्थबोध, समाप्तिः अर्थात् निराकाङ्क्षत्वम्। एवञ्च निराकासार्थबोधकत्वात् वाक्यस्फोटस्य मुख्यत्वमिति द्वितीयहेतोरर्थः। न्यायभाष्योक्तं वाक्यलक्षणम् 'न सामयिकत्वाच्छब्दार्थसंप्रत्ययस्य' (न्या. सू. २।१।५४) इति सूत्रे न्यायभाष्यकारो वात्स्यायनो वाक्यलक्षणमाह- 'पदसमूहो वाक्यमर्थसमाप्तौ' इति। अत्र पदं सुबन्त तिङन्तं च, 'ते भविक्त्यन्ताः पदम्' (न्या. सू. २।२।५५) इति गौतमसूत्रस्मरणात्। पदसमूहश्च सुबन्तसमूहो यथा त्वया भोक्तव्यम्, तिङन्तसमूहो यथा पचति, भवति, सुबन्ततिङन्तसमूहो यथा चैत्रः पचति। एतेन शक्त पदमिति **प्रतप्रत्यय** घटितसमूहस्य पचतीत्यादेर्वाक्यत्वमिति चाधुनिकनैयायिकसम्मतं निरस्तम्, अर्थसमाप्तेरभावेन न्यायभाष्यविरोधात्। स्फोटात्मकवाक्यस्य व्यवहारोपयोगिनः लक्षणम् 'समर्थः पदविधिः' (पा. अ. २।१।१) इत्यत्र महाभाष्ये- 'आख्यातं सविशेषणं वाक्यम्' इति लोकोपयोगि वाक्यलक्षणमत्र प्रासङ्गिकम्। इहाख्यातपदेन क्रियाप्रधानं लक्षणया बोध्यते। तेन त्वया शयितव्यम् इत्यादीनामपि वाक्यत्वं सिद्ध्यति। सविशेषणमित्यस्य साक्षात् परम्परया वा यद्विशेषणं तत्सहितमित्यर्थः। तेन नद्यास्तिष्ठति कूले इत्यादौ नद्यादेरपि एकवाक्यावयवत्वसिद्धिः। सविशेषणत्वेन विभागे साकाङ्क्षत्वं लभ्यते। एतदेव एकोद्देश्यकैकविधेयकत्वरूपैकार्थत्वगर्भमेकवाक्यत्वलक्षणं ज्ञेयम्। 'अर्थैक्यादेकं वाक्यं साकाङ्क्षं चेद् विभागे स्यात्' इति (पू. मी. २।१।१४) महर्षिजैमिनिवचोऽपि तदनुगुणमेव। 'सुप्तिङन्तचयो वाक्यं क्रिया वा कारकान्विता' इत्यमरोक्तं लक्षणमपि लोकोपयोग्येव। तत्र वाशब्दश्चेदर्थे। कारकान्वितक्रिया चेद् बोध्येत्यर्थः। एवञ्च कारकान्वितक्रियाबोधकः सुबन्तचयः, कारकान्वितक्रियाबोधकतिङन्तचयः कारकान्वितक्रियाबोधकसुबन्ततिङन्तसमुदायो वाक्यमिति त्रिविधं वाक्यलक्षणम्। सुप्तिङन्तचयः इत्यत्र सुप् च तिङ् च सुप्तिङौ, तौ अन्ते ययोः ते सुप्तिङन्ते। सुप्विशिष्टं तिङन्तं सुप्तिङन्तम्, अत्र सुप्पदं सुबन्तपरं तेषामेकशेषः। शास्त्रीयप्रक्रियपयोगि वाक्यलक्षणम्-लोकोपयोगि 'आख्यातं सविशेषणं वाक्यमि'ति लक्षणं वाक्येऽव्याप्तम्, विशेषणानुपादाने सविशेषणत्वाभावात्। अतः शास्त्रोपयोगि वाक्यलक्षणमुक्तं वार्तिककृता- 'एकभतङ् वाक्यम्' इति। एकतिङित्यस्य एकानुपूर्वीकैकतिङन्तवदित्यर्थकरणेन 'ब्रूहि ब्रूही'त्यत्र समन्वयः। वाक्यत्वफलन्तु प्रश्नोत्तरे अनन्त्यस्यापि

प्रश्नाख्यानयोरित्यनेन वाक्यस्य टेः प्लुतसिद्धिः। पचति भवति, पश्य मृगो धावति, इत्यादौ एकानुपूवीकैकतिङर्थमुख्यविशेष्यकबोधजनकत्वमित्यर्थेन निर्वाहः। वस्तुतस्तु एकोऽनवयवः शब्दः स्फोटलक्षणो वाक्यम्। स चायं स्फोट आन्तरप्रणवरूप एव ओंकार एव सर्वा वाक् सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी (वाक्यपदादिरूपा) नानारूपा भवति इति श्रुतेः। प्रतिभैव वाक्यार्थः। तयोश्च तादात्म्याध्यासमूलकः सम्बन्धोऽपि वाच्यवाचकभावाख्योऽखण्ड एव। एकतिङ् इत्यादि तु शास्त्रप्रक्रियानिर्वाहायेति परमार्थः।

### स्फोटप्रतिपादने नागेशस्य वैशिष्ट्यम्

स्फोटप्रतिपादने इतरवैयाकरणेभ्यो नागेशस्य वैभशष्ट्यं विमृश्यते। यद्यपि नागेशेन स्वसिद्धान्तोपस्थापनाय वाक्यपदीयम् उपजीव्यते, तथापि वेदोपनिषन्महाभारत-गीता-पुराणादीनामन्यशास्त्राणां मतमपि यथाप्रसङ्गमुपस्थाप्य समन्वयात्मकरूपेण, तार्किकरूपेण, प्रामाणिकरूपेण च सः स्फोटतत्वं प्रतिपादितवान् अस्ति। उत्पत्तिविनाशरहितं शब्दतत्वं स्फोटात्मकं ब्रहम एवार्थभावेन विवर्तते । ( वा. प. १। १ ), शब्दपरमाणव एव च छायारूपेण, आतपरपेण, तमोरूपेण, शब्दरूपेण च विवर्तन्ते ( वा. प. १।१०९-११० ), सर्गादौ छन्दोभ्य = शब्दतत्त्वात् एवेदं विश्वं व्यवर्तत ( वा. प. १।१०९-११९ ) इति भर्तृहरिप्रदर्शिता सृष्टिप्रक्रियाऽस्ति। इत्थञ्च शब्दादेव सम्पूर्णस्यापि पदार्थजातस्य सृष्टिर्भवतीति भर्तृहरिमतं दृश्यते, किन्तु सृष्टिप्रक्रियाविषये स्पष्टतरं मतं न दृश्यते तस्य। परन्तु नागेशाभिमतसृष्टिक्रमः अस्मात् किञ्चित् भिद्यते, स्पष्टतरश्च सः। नागेशमते हि –

प्रलये नियतकालपरिपाकानां सर्वप्राणिकर्मणामुपभोगेन प्रलयाल्लीनसर्वजगत् माया चेतने ईश्वरे लीयते। लीयते = सुप्तेव तिष्ठति। ततोऽपरिपक्वप्राणिकर्मभिः कालवशात् प्राप्तपरिपाकैः स्वफलप्रदानाय भगजतोऽबुद्धिपूर्विका सृष्टिर्मायापुरुषावाविभवतः। ततः परमेश्वरस्य भससृक्षात्मिका मायावृत्तिर्जायते। ततो विन्दुमव्यक्तं त्रिगुणं जायते। इदमेव शक्तितत्त्वम्। तस्य बिन्दोरचिदंशो बीजम्, चिदचिन्मिश्रोंऽशो नादः, चिदंशो बिन्दु रिति। अचिच्छब्देन शब्दार्थोभयसंस्काररूपाऽविद्योच्यते I अस्माद् बिन्दोः शब्दब्रह्माऽपरनामधेयं वर्णादिविशेषरहितं ज्ञानप्रधानं सृष्ट्युपयोग्यवस्थाविशेषं चेतनमिश्रं नादमात्रमुत्पद्यते। एतज्जगदुपादानमेव रवपरादिशब्दैर्व्यवह्रियते। स एव च शब्दब्रह्मेति गीयते (भट्टः, २०४७, पृ. २६७-२७१) इति। किं च वाक्यपदीयकारः नित्यं शब्दब्रह्म शब्दभावेन विवृतं सद् अर्थभावेन विवर्तते इति प्रतिपादयन् शब्दब्रह्मण एव सर्वजगदुपादानत्वं मन्यते, परं नागेशस्तु शब्दब्रह्मणो नित्यत्वमास्थाय अर्थसृष्टौ तज्जन्मानुपलम्भात् यावत् सृष्टिस्थित्या व्यवहारनित्यतया वा नित्यत्वं, नतु कूटस्थनित्यत्वमिति प्रतिपादयति। नागेशः शब्दब्रह्म-परब्रह्मणोर्भेदं भर्तृहरिश्चाभेदं मन्यते। मोक्षविषये भर्तृहरेर्नागेशस्य च मतैक्यं न दृश्यते। स्फोटवादस्यान्ते नागेशेन यद्यपि वाच्यं वाचकं च ब्रह्मसत्तैव इत्युच्यते तथापि कथं तस्य ब्रह्मणः प्राप्तिरिति उपपादितं न दृश्यते। स हि स्फोटरूपस्य ब्रह्मणः केवलं स्वरूपकथनमेव करोति, न तु प्राप्त्युपायकथनम्। भर्तृहरिस्तु शब्दतत्त्वप्राप्त्युपायो वेदः (वा. प. ब्र. का. श्लो. ५) व्याकरणाध्ययनजन्यशब्दसंस्काराच्च परमात्मसिद्धिः ( वा. प. १। १३०) इति प्रतिपादयति।

स्फोटविभागविषये नागेशमतं भट्टोजिदीक्षित-कौण्डभट्टादिमतेन तुल्यमेव दृश्यते। भट्टोजिदीक्षितेन शब्दकौस्तुभे स्फोटदर्शन सविस्तरं प्रतिपादितम्। तत्र निर्णीत एवार्थो वैयाकरणसिद्धान्तकारिकासु संक्षेपेण प्रस्तुतः, ताश्च कारिकाः व्याख्याय कौण्डभट्टेन वैयाकरणभूषणसारग्रन्थो निर्मितः। तदनुसारेण च दीक्षितकौण्डभट्टयोर्द्वयोरपि मते अष्टौ स्फोटाः प्रतिपाद्यन्ते।। तत्र च (१) वर्णस्फोटः (२) पदस्फोटः (३) वाक्यस्फोटः (४) अखण्डपदस्फोटः (५) अखण्डवाक्यस्फोटश्चेति पञ्चव्यक्तिस्फोटाः, वर्ण-पद-वाक्यभेदसेन त्रिविधो (६, ७, ८) जातिस्फोट इति। अष्टावपि एते पक्षाः न तु स्वयं निरूपिता अपि तु सिद्धान्तग्रन्थेषु तत्रतत्रोपनिबद्धा इति स्वयं भट्टोजिदीक्षितः शब्दकौस्तुभे प्रस्तौति। अनयैव परम्परया एव नागेशेनापि अष्टावेव स्फोटभेदाः स्फोटवादग्रन्थे विवेचिताः, परमलघुमञ्जूषायाञ्च चर्चिताः।

वैयाकरणानां परम्परानुसारेण यद्यपि भट्टोजिदीक्षित-कौण्डभट्टाभ्यां, अष्टौ स्फोटाः स्वीकृताः प्रतिपादिताश्च तथापि नागेशभट्ट एव पूर्वपक्षिमतखण्डनपुरस्सरम् अष्टविधस्फोटानां स्वरूपं सम्यगुपपादितवान्। अष्टविधस्फोटानां सुष्ठु प्रतिपादनायैव अनेन 'स्फोटवादः' इति ग्रन्थः विरचितः। यद्यप्ययं ग्रन्थः वैयाकरणसिद्धान्तमञ्जूषायाः (बृहन्मञ्जूषायाः) भाग इति बहुभिर्मन्यते, तथापि अस्य स्फोटविभागप्रतिपादनरुपस्वतन्त्रग्रन्थत्वेन स्वीकारेपि नास्ति दोषः। लघुमञ्जूषायाञ्च स्फोटविषयकं दार्शनिकचिन्तनमपि प्रस्तुतम्, यत्र स्फोटस्य परब्रह्मवाचकत्वं स्वीकृतम्। एवं च नागेशः स्वसमये उपलभ्यमानान् स्फोटसम्बन्धान् प्रायेण सकलानपि सिद्धान्तान् पर्यालोच्य तत्र तत्र स्वाशयानप्युपस्थाप्य स्फोटसिद्धान्तस्य चीरप्रतिष्ठां दत्तवान्। स्फोटवादग्रन्थान्ते 'वाच्यं वाचकं च ब्रह्मैवेति ध्येयम्, शास्त्रीयप्रक्रिया तु जातिव्यञ्जकबोधार्था' इत्युक्त्वा जातिस्फोटो मुख्यत्वेन स्वीकृतो दृश्यते नागेशेनेत्यलं विस्तरेण।

## निष्कर्षः

'स्फोटतत्त्वनिरूपणम्' इति शीर्षकस्य प्रमुखनिष्कर्ष इत्थमस्ति- अर्थावगतिरूपात् कार्यात् तत्करणस्य स्फोटस्यानुमानम्। स च स्फोटो निरवयवो नित्यो निष्क्रमकश्च। यतोऽर्थप्रतिपत्तिः स शब्दः। अर्थप्रतिपत्तिश्च स्फोटादेव, न वणेभ्य इति स्फोट एव शब्दः। ध्वनय एव वर्णा एव वा स्फोटस्य व्यञ्जकाः। तत्र कौण्डभट्टानुसारं वर्णानां व्यञ्जकत्वम्। श्रौत्रे प्रत्यये प्रतिभासमानस्य स्फोटस्य प्रत्यक्षत्वमपि। परमार्थतो निरवयवमेव वाक्यं, निरवयवस्यैव वाक्यार्थस्य तत्र बोधकत्वम्। अवयवकल्पनायां हि यथा वाक्यस्यावयवाः पदानि, पदानामवयवा वर्णाः, तथा वर्णानामप्यवयवैर्भवितव्यम्। तथा चानवस्था स्यात्। पदार्थेभ्योऽन्य एव वाक्यार्थः पानकादिवत्। प्रकृतिप्रत्ययांशवत् असतः पदार्थस्य कल्पनं वाक्यार्थावगमोपायतयाऽऽश्रीयत ।

अस्य शोधप्रबन्धस्य मुख्योद्देश्यं वास्तविकस्फोटतत्त्वस्य स्वरूपं कथं भवति, वैयाकरणानां मते स्फोटतत्त्वं कथं भवति, वास्तविक स्फोटभेदाः कति सन्ति इत्येतेषां विषयाणां समुद्घाटनार्थमस्ति। अत्र स्फोटतत्त्वं विवेचयितुं पूर्णः प्रयासः कृतोऽस्ति। अत्र वैयाकरणाभिमत स्फोटतत्त्वं निरूपणं तथा च स्फोटस्याष्टौ भेदानां सूक्ष्मरूपेण निरूपणमस्ति। स्फोटतत्त्वस्य निरूपणानन्तरं अष्टौ स्फोटभेदानां क्रमेण निरूपणं वर्तते। व्याकरणशास्त्रे शब्दः स्फोटात्मको ब्रह्मरूपो नित्यश्च। व्याकरणशास्त्रे शब्दं विना किमपि न सम्भवति। शास्त्रे शब्दाः शब्दपराः भवन्ति, न तु अर्थपराः। एतदर्थं

शास्त्रेषु स्फोटतत्त्वस्य विशिष्टं स्थानं बिभर्ति। इत्थञ्च आलेखेऽस्मिन् स्फोटतत्त्वविषयेऽतीवगहनैः प्रामाणिकतर्कैर्विस्तृतरूपेण स्फोटतत्त्वं निरूपणं वर्तते।

## कृतज्ञताज्ञापनम्

शोधस्यास्य प्राविधिकदृष्ट्या विषयप्रतिपादनदृष्ट्या च साधु परिक्षणं विधाय सम्पादनाय परिष्काराय च महदुपकारं कृतवद्भ्यः सर्वेभ्यः गुरुजनेभ्यः सहायकेभ्यश्चान्येभ्यः हार्दं कार्तज्ञ्यं व्यनज्मि।

## सन्दर्भग्रन्थसूची

काव्यादर्शः,(१९३८), *पुण्यपत्तनम्*(पूना) भाण्डारकप्राच्यविद्यामन्दिरम्।

कृष्णमाचार्यः(१९४६),(सम्पा.)*नागेशभट्टकृतः* स्फोटवादः,मद्रासः द अड्यार लाइब्रेरी।

झाः, (२०१८),बोधकुमारः,*परमलघुमंजूषा*, जयपुरः हंस प्रकाशन।

पतंजलिः, (२०१७), *व्याकरणमहाभाष्यम्*,वाराणसीः वाणिविलासप्रकाशन।

भर्तृहरिः, (२०४७), *वाक्यपदीयम्*, वाराणसीः चौखम्बा विद्याभवन।

*मनुस्मृतिः*, (२००५), सम्पा-राजवीर शास्त्री, दिल्लीः साहित्य प्रचार ट्रस्ट।

*शतपथब्राह्मणम्*,(१९४०)सायणाचार्यविरचित-वेदार्थप्रकाशाख्य-भाष्यसमेतम्,प्रथमो भागः,कल्याण-बम्बईः गंगाविष्णु कृष्णदास।

*श्रीमद्भगवद्गीता*, (२०६९),गोरखपुरःगीताप्रेस।

*हरिवंशपुराणम्*,पर्व ३ (भविष्यपर्व)-विकिस्रोतः।